# Garudakritam Hari Stotram

# ગરુડકૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Garudakritam Hari Stotram

File name : garuDakRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 207/11-24||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# ગરુડકૃતં હરિસ્તોત્રમ્

ગરુડોઽતિપ્રસન્નઃ સન્ દૃષ્ટ્વા નનામ દણ્ડવત્ ।
પુલકાંઽકિતસર્વાઙ્ગસ્તુષ્ટાવ ચ કૃતાઞ્જલિઃ ॥ ૧૧॥

જય ત્રિલોકજીવાનાં પ્રાણરૂપ પ્રભો હરે ।
અઘનાશકગીર્વાણવન્દિતચરણામ્બુજ ॥ ૧૨॥

સુરારિધ્વંસસામર્થ્ય સુરાસુરનમસ્કૃત ।
સ્વભક્તહૃદ્ગતમોહધ્વંસકૃત્ તે નમોનમઃ ॥ ૧૩॥

તાપત્રયપ્રશાન્તિકૃચ્ચરણોભ નમોઽસ્તુ તે ।
જગજ્જન્મસ્થિતિધ્વંસકાર્યકૃત્રિસ્વરૂપક ॥ ૧૪॥

ભક્તમાનસસદ્ગમ્ય શાસ્ત્રવેદાદિરૂપિત ।
સુરાસુરપ્રવન્દિતપાદપદ્મ નમોઽસ્તુ તે ॥ ૧૫॥

અષ્ટૈશ્વર્યસમાયુક્ત વનમાલાવિરાજિત ।
કઞ્જનેત્ર તિલપુષ્પનાસિકાઽલક્ત પત્તલ ॥ ૧૬॥

સ્થલપદ્મપત્રતુલ્યકરદ્વય નમોઽસ્તુ તે ।
ભક્તહૃત્કૃતનિત્યાસ દિવ્યગુણગણાન્વિત ॥ ૧૭॥

અવિતાઽઽત્મજન ધર્મમૂર્તે હરે નમોઽસ્તુ તે ।
દિવ્યૈશ્વર્યસમજુષ્ટ પાહિ માં પરમેશ્વર ॥ ૧૮॥

એકઃ સન્નપિ સર્વત્રાઽનન્તરૂપધર પ્રભો ।
ભક્તકાર્યકૃતે દ્રાક્ ચાયાસિ નાથ નમોઽસ્તુ તે ॥ ૧૯॥

ક્વાઽહં પક્ષી તમોવ્યાપ્તઃ ક્વ ત્વં સત્ત્વમયઃ પ્રભુઃ ।
કૃપા તે દર્શને હેતુઃ કૃપાલોઽસ્તુ ચ તે નમઃ ॥ ૨૦॥

સાપરાધસ્ય લોકસ્ય રક્ષાં કરોષિ સર્વથા ।
હિતકૃત્ સુખકૃચ્ચૈવ ગુણાશ્રય નમોઽસ્તુ તે ॥ ૨૧॥

યજ્ઞભુક્ વિશ્વસમ્પુષ્ટિકૃત્ ત્રાહિ માં જનેશ્વર ।
કન્યામ્બરાણિ નીત્વા ચ કદમ્બવૃક્ષમાસ્થિત ॥ ૨૨॥

પ્રેમભક્તિસમાલભ્ય દાસૈકકરુણાઽવ મામ્ ।
વિશ્વદુઃખપ્રશમન મે દાસ્યં દેહિ કેશવ ॥ ૨૩॥

એવં સ્તુતો હરિઃ સાક્ષાદ્ગરુડેન મહાત્મના ।
સમાજુહાવ ગઙ્ગાં ચ પૂજાર્થં સ્વસ્ય તત્ર વૈ ॥ ૨૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૨૦૭-અધ્યાયાન્તર્ગતં
ગરુડકૃતં હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૨૦૭/૧૧-૨૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 207/11-24..

Proofread by PSA Easwaran

*Garudakritam Hari Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*